"आषाढ्यां समतुलिताधिवासितानाम् अन्येद्युर्यदधिकतामुपैति वीजम्। तद्वृद्धिर्भवति न जायते यदूनं मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय। स्तोतव्या मन्त्रयोगेन सत्या देवी सरस्वती। दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्यसि। येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणास्तथा। उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च। यत्सत्यं सर्ववेदेषु यत्सत्यं ब्रह्मवादिषु। यत्सत्यं त्रिषु लोकेषु तत्सत्यमिह दृश्यताम्। ब्रह्मणो दुहिता चासि त्वमादित्येति कीर्तिता। काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला। क्षौमं चतुःसूत्रकसन्निबद्धं षडङ्गुलं शिक्यकवस्त्रमस्याः। सूत्रप्रमाणं च दशाङ्गुलानि षडेव कक्षोभयशिक्यमध्ये। याम्ये शिक्ये काञ्चनं सन्निवेश्य शेषद्रव्याण्युत्तरेऽम्बूनि चैवम्। तोयैः कौप्यैः स्यन्दिभिः सारसैश्च वृष्टिर्हीना मध्यमा चोत्तमा च। दन्तैर्नागा गोहयाद्याश्च लोम्ना हेम्ना भूपाः सिक्थकेन द्विजाद्याः। तद्वद्देशा वर्षमाशा दिशश्च शेषद्रव्याण्यात्मरूपस्थितानि। हैमी प्रधाना रजतेन मध्या तयोरलाभे खदिरेण कार्या। विद्धः पुमान् येन शरेण सा वा तुला प्रमाणेन भवेद्वितस्तिः। हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम्। एतत्तुलाकोशरहस्यमुक्तं प्राजेशयोगेऽपि नरो विदध्यात्"।

**तुलाकूट** न० ६त०। तुलामानस्य कूटे १प्रकृतमानापेक्षया न्यूनतापादने। तुलायां कूटं यस्य। २तत्कारिणि पुरुषे च "मानकूटं तुलाकूटं कण्टमोषं निपीड्य" काशी०८अ० स्वकिङ्करं प्रति यमवाक्यम्।

**तुलाकोटि(टी)** स्त्री तुलया तुलां वा कोटयति कुट—परितापे-इन् वा ङीप्। नूपुरे, "तुलाकोटिक्वाणैः कुसुमशरमुज्जागरयति" उद्भटः। "स्खलत्तुलाकोटिनिनादकोमलः" माघः।

**तुलाकोश** पु०तुला कोश इव। तुलायां भाविशस्यहानिवृद्धिज्ञापनार्थतुलारूपे मानदण्डभेदे वृ०सं०वाक्यं तुलाशब्दे दृश्यम्। २तुलया परीक्षणे च मिता०।

**तुलादान** न० तुलया स्वदेहमानेन दानम्। तुलापुरुषसंज्ञके महादाने मत्कृततुलादानादिपद्धतौ तत्प्रयोगो दृश्यः।

**तुलाधट** पु०तुलायै तोलनाय धटः। तुलाधारदण्डे त्रिका०।

**तुलाधर** त्रि०तुलाया मानदण्डस्य धरः धृ-अच्। १वाणिजके, २तुलाराशौ, ३तुलादण्डधारके त्रि० मेदि०।

**तुलापुरुष** पु० षोड़शसु महादानेषु आद्ये महादाने तत्प्रकारः मत्स्यपु०२७२अ०उक्तो यथा "अथातः सम्प्रवक्ष्यामि महादानानुकीर्तनम्" इत्युपक्रमे। "आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम्" महादानानि विभज्य उक्तं यथा "मत्स्य उवाच। यानि नोक्तानि गुह्यानि महादानानि षोड़श। तानि ते कथयिष्यामि यथावदनुपूर्वशः। तुलापुरुषयागोऽयं येषामादौ विधीयते। अयने विषवे पुण्ये व्यतीपाते दिनक्षये। युगादिषूपरागेषु तथा मन्वन्तरादिषु। सङ्क्रान्तौ वैधृतिदिने चतुर्दश्यष्टमीषु च। सितपञ्चदशीपर्वद्वादशीष्वष्टकासु च। यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने। द्रव्यब्राह्मणलाभे वा श्रद्धा वा यत्र जायते। तीर्थे वायतने वापि तड़ागे रुचिरे तथा। महादानानि देयानि संसारभयभीरुणा। अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम्। केशेष्वेव गृहीतः सन् मृत्युना धर्म्ममाचरेत्। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। षोड़शारत्निमात्रन्तु दश द्वादश वा करान्। मण्डपं कारयेद्विद्वान् चतुर्भद्रासनं बुधः। सप्तहस्ता भवेद्वेदी मध्ये पञ्चकरा तथा। तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं बुधः। कुर्य्यात् कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः। समेखलायोनियुतानि कुर्य्यात् सम्पूर्णकुम्भानि महासनानि। सुताम्रपात्रद्वयसंयुतानि सयज्ञपात्राणि सुविष्टराणि। हस्तप्रमाणानि तिलाज्यधूपपुष्पोपहाराणि सुशोभनानि। पूर्वोत्तरे हस्तमिताथ वेदी ग्रहादिदेवेश्वरपूजनाय। अत्रार्चनं ब्रह्मशिवाच्युतानां तत्रैव कार्य्यं फलमाल्यवस्त्रैः। लोकेशवर्णैः परितः पताकामध्ये ध्वजः किङ्किणिकायुतः स्यात्। द्वारेषु कार्य्याणि च तोरणानि चत्वार्य्यपि क्षीरवनस्पतीनाम्। द्वारेषु कुम्भद्वयमत्र कार्य्यं स्रग्गन्धधूपाम्बररत्नयुक्तम्। शालेङ्गुदीचन्दनदेवदारुश्रीपर्णिविल्वप्रियकाञ्चनोत्थम्। स्तम्भद्वयं हस्तयुगावखातं कृत्वा दृढं पञ्चकरोच्छ्रितञ्च। तदन्तरं हस्तचतुष्टयं स्यादथोत्तराङ्गञ्च तदङ्गमेव। समानजातिश्च तुलावलम्बग्रा हैमेन मध्ये पुरुषेण युक्ता। दैर्घ्येण सा हस्तचतुष्टयं स्यात् पृथुत्वमस्यास्तु दशाङ्गुलानि। सुवर्णपट्टाभरणा तु कार्य्या सा लोहपाशद्वयशृङ्खलाभिः। युता सुवर्णेन तु रत्नमालाविभूषिता माल्यविलेपनाभ्याम्। चक्रं लिखेद्वारिजगर्भयुक्तं नानारजोभिर्भुवि पुष्पकीर्णम्। वितानकञ्चोपरि पञ्चवर्णं संस्थापयेत् पुष्पफलोपशोभम्। अथर्त्विजो वेदविदश्च कार्य्याः सुरूपवे-